# वेदे नारीनामधिकारविमर्शः

सुचन्द्रा मुखर्जी

## प्रबन्धसारः

*परिवारव्यवस्था भारतीयसमाजस्य एकं मुख्यम् अङ्गं भवति। परिवारस्य च अङ्गद्वयं नारी पुरुषश्चेति। पुरुषं विना नारी यद्वा नारीं विना पुरुषः कदापि सम्पूर्णो भवितुं नार्हति। अतः परिवारे यद्वा समाजे नारीपुरुषयोरुभयोः समानाधिकारो दायभारश्च विद्यत एव। वैदिककाले नारीणां स्थानं यथार्थं सम्मानपूर्णमासीत्। समाजे ताभिः पुरुषवत् समानाधिकारोऽनुभूयते स्म। यथा धार्मिकाधिकारः, सामाजिकाधिकारः, शिक्षाप्राप्त्यधिकारः, सम्पत्तिसंक्रान्ताधिकारः स्वतन्त्रतायाः अधिकारः चेत्यादयः। एतेषामधिकाराणां विषये अस्मिन् प्रबन्धे यथामति चर्चा विहिता।*

## उपोद्घातः

भारतीयसमाजव्यवस्थायाः मुख्यत्वेन परिवार एव स्वीक्रियते। परिवारेऽस्मिन् मुख्यरूपेणाङ्गद्वयं विद्यते – पुरुषो नारी चेति। परस्परमङ्गद्वयमेकमपराश्रितमेवावतिष्ठते। अङ्गद्वयमिदं जीवनभूतस्य रथस्य चक्रद्वयमिव। चक्रद्वयेन सम्यक् गमनेनैव जीवनं प्रसन्नतामाप्नोति। एतत्तु सत्यं यत्सुदूरवैदिककालाद् भारतीयसमाजव्यवस्था पुरुषप्रधानासीत्, किन्तु सुष्ठु परिवारसञ्चालनाय नार्य्याः माहात्म्यं पुरुषवदासीत्। यतो हि पुरुषं विना नारी यद्वा नारीं विना पुरुषः कदापि सम्पूर्णो भवितुं नार्हति। अतः परिवारे यद्वा समाजे नारीपुरुषयोरुभयोः समानाधिकारो दायभारश्च विद्यत एव। वैदिककाले नारीणां स्थानं यथार्थं सम्मानपूर्णमासीत्। समाजे ताभिः पुरुषवत् समानाधिकारोऽनुभूयते स्म। यथा धार्मिकाधिकारः, सामाजिकाधिकारः, शिक्षाप्राप्त्यधिकारः, सम्पत्तिसंक्रान्ताधिकारः स्वतन्त्रतायाः अधिकारः चेत्यादयः। एतेषामधिकाराणां सविशदं वर्णनं निम्नधा क्रियते।

### धार्मिकाधिकारः

अथर्ववेदसंहितायामुक्तं यत् "शुद्धाः पूता योषितो यज्ञिया इमाः" इति। अर्थात् नारीभिः शुद्धाभिः पवित्राभिश्च यज्ञः करणीयः। अनेन स्पष्टं यद्वैदिककाले नारीणां धार्मिककार्येऽधिकारः आसीत्। स्त्रीः पुरुषश्चोभौ एकत्र यज्ञमकुरुताम्। ऋग्वेदे आम्नातं यत् स्त्री पुरुषेण सह यज्ञेऽसीदत्तथा च तासां स्त्रीणां यज्ञेऽधिकारः आसीत्। यथोच्यते – 'दम्पती समनसा सुनुतः' इति। स्त्रीं विहाय केनचित्पुरुषेण यज्ञः सम्पाद्यते चेत्स यज्ञः असम्पूर्णः भवतीति तैत्तिरीयब्राह्मणे समुपलभ्यते।[1] अत एव यज्ञस्य सफलतायै स्त्री पुरुषश्चोभयोः समानाधिकारः आसीत्। ऋग्वेदे स्पष्टरूपेण समुपलभ्यते यत्पतिः पत्नी च एकत्र देवतानां पूजामकुरुताम्। अत एवोच्यते – 'अञ्जन्ति दम्पती समनसा'।[2] तेन ज्ञायते यत्पत्नी पत्या समाना एव देवपूजायाम् अधिकारी आसीत्। अथर्ववेदसंहितायामपि स्पष्टतया उल्लिख्यते यत् पतिः पत्नी चोभौ एकत्र यज्ञसम्पादनम् अकुरुताम् – 'यतस्रुचा मिथुना या सपर्यतः'।[3] इत्थमुपर्युक्तवर्णनेन ज्ञायते यद्वैदिककाले धार्मिककार्ये नारीणां पुरुषाणां च समानाधिकारः आसीत्।

### सामाजिकाधिकारः

प्राचीनधर्मशास्त्रीयसामाजिकव्यवस्थायां कन्यायाः स्थानं पुत्रापेक्षया हीनम् इति मन्यते। अथर्ववेदानुसारं वैदिकयुगे पुत्रसन्तानप्राप्तौ पारिवारिकजनाः बहु आनन्दिताः भवन्ति स्म, किन्तु अस्य कथनस्य तात्पर्यं इत्थं न यत्पुत्रीसन्तानप्राप्तौ ते दुःखिताः भवन्ति स्म। पुत्रवत् कन्यायाः अपि सर्वे संस्कारा भवन्ति स्म। निरुक्तानुसारं कन्यायाः कमनीयस्वभावत्वात् सर्वे तां स्नेहयन्ति स्म। "कन्या कमनीया भवति"।[4] वैदिकसाहित्ये गृहस्य वातावरणं शान्तं सुखमयञ्च कर्तुं पतिपत्न्योः मधुरसम्बन्धः अपेक्षित आसीत्। अथर्ववेदानुसारं नववधूः गृहप्रवेशकाले स्वकीयं पतिं वदति त्वं केवलं मे पतिस्तथा मां विहाय त्वयापरनार्याः नामोच्चारणं न करणीयम्। यथोच्यते – 'मम केवलो नान्यास्त्रीं कीर्तयाश्चन'।[5] तत्र ऋग्वेदानुसारं पत्या नववधूः प्रार्थयते यत्पत्नी गृहस्य सकलान् सदस्यान् निमन्त्रयेत् पारिवारिकसुखं समृद्धञ्च कुर्यात्।[6] तेन ज्ञायते यद्वैदिकसाहित्ये नारीणां परिवारनियन्त्रणस्य अधिकारः आसीत्।

### शिक्षाप्राप्त्यधिकारः

वैदिकसाहित्याध्ययनेन ज्ञायते यत् तदा समाजे नारीणां शिक्षाव्यवस्था समुन्नता आसीत्। पुत्रवत् पुत्र्यः अपि शिक्षाग्रहणेऽग्रगण्याः आसन्। पुत्रीणां विवाहयोग्यतासम्पादनाय अध्ययनमनिवार्यम् आसीत्।[7] अतः स्वयं मातापितरौ कन्यां ब्रह्मचर्यजीवने प्रतिष्ठितामकुरुताम्। अध्ययनरतानां छात्राणां श्रेणीद्वयमासीत्। प्रथमं 'ब्रह्मवादिनी' अपरञ्च 'सद्योद्वाहा'। याः छात्रा आजीवनं दर्शनस्य ब्रह्मविज्ञानस्य चाध्ययनं कुर्वन्ति स्म ताः ब्रह्मवादिन्य उच्यन्ते तथा याः छात्र्यः विवाहस्य पूर्वपर्यन्तमध्ययनं कुर्वन्ति स्म ताः सद्योद्वाहा नाम्नाभिधीयते। कन्यानां कृते वेदध्यायनमनिवार्यमासीत्। कुतोहि यस्मात् ताः सर्वाः प्रातः सायं वैदिकप्रार्थनाः कुर्वन्ति स्म। पत्या समञ्च ताः मन्त्रोच्चारणं

[1] तै.ब्रा. – ३/८/३१/२
[2] ऋ. – ४/३/१
[3] अथर्व. – २०/२४/०३
[4] निरुक्तम् – ४/२४
[5] अथर्व. – ७/३७
[6] ऋ. – १०/८५/४६
[7] अथर्व. – ११/५

ISSN : 2583-2271
Vol. - I, No. 1: 2021

यज्ञे कुर्वन्ति स्म। उच्चशिक्षायाः कृते ताः गुरुकुलं न गच्छन्ति स्म। समाजस्यारुचिकरमन्तव्यस्य भयात् तासां सर्वासां शिक्षाग्रहणस्य व्यवस्था गृहे एव भवति स्म। कन्याभ्यः धर्मस्य दर्शनशास्त्रस्य च शिक्षायाः कृते विशेषव्यवस्था आसीत्। तेन सह नृत्यगीतादीनां शिक्षाग्रहणमपि भवति स्म।[8]

**सम्पत्त्यधिकारः**

वैदिककाले नारी सम्पत्तिविषयका-धिकारतः उपेक्षिता आसीत्। विवाहकाले एव मातापितरौ कन्यायाः उपयुक्तपात्रेण सह सम्पर्कमकुरुताम्। यथासम्भवं वरपणं स्त्रीधनञ्च प्रदाय पतिगृहे प्रेषणमकुरुताम्। विवाहकाले पर्याप्तधनसम्पत्तिप्रदानत्वात्तस्याः कन्यायाः पितुः सम्पत्यामधिकारः नासीत्। उक्तञ्च ऋग्वेदे – "न जाये तान्वो रिक्थमारैक"।[9] किन्तु एतदपि स्पष्टरूपेण समुपलभ्यते यदविवाहितकन्यायाः पितुः सम्पत्यामुपरि यथार्थः अधिकारो विद्यते। यतोहि अविवाहितत्वात्तस्यै वरपणं स्त्रीधनञ्च किमपि विशेषधनरूपेण न दीयते स्म।[10] विषयेऽस्मिन् अविवाहितकन्यायाः भरणपोषणं पिता करोति स्म। पितुः मातुश्च मरणानन्तरं सम्पत्त्याः अधिकारः कन्याया एव।

**स्वतन्त्रतायाः अधिकारः**

वैदिककाले नारीणां कस्मिंश्चित् क्षेत्रे स्वतन्त्रता आसीत्। पतिचयनविषये तासां स्वतन्त्रता आसीत्। कन्या स्वेच्छया पतिचयनं करोति स्म तथा चितवरेण सह तस्याः विवाहो भवति स्म। ऋग्वैदिककाले स्वयंवरस्योल्लेखः समुपलभ्यते – "भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं कृणते जने इत्"।[11] आत्मविश्वासेन स्वमतोपस्थापनाय तदा नववधूभ्यः आशीर्वादप्रदानस्य व्यवस्था आसीत्।[12] एवं स्पष्टं यद्वैदिकयुगे नारीणां सभायां स्वमतदानस्य स्वतन्त्रता आसीत्।

इत्थमुपर्युक्तवर्णनेन ज्ञायते यद्वैदिककाले नारीणां मर्यादापूर्णं सम्मानजनकं च स्थानमासीत्। पुत्र-पुत्रीणां समानरूपेण पालनपोषणे सति समाजस्य पितृतान्त्रिकत्वात् पुत्राणां दायभारः समाजेऽधिक आसीत्। तथापि तदा नारीणामधिकारः पुरुषाणां समानमासीत्तत्तु स्वीकरणीयमेव इति दिक्।

---

[8] तै.सं. – ६/५/१०
[9] ऋ. – ३/३१/२
[10] तदेव – २/१७/७
[11] तदेव – १०/२७/०२
[12] तदेव – १०/८५/२६

## सहायकग्रन्थाः

### Primary Sources:


- *Yajurveda kā Subodhabhāṣya.* Ed. by Sripad Damodar Satavlekar. Swadhyay Mandal : Pardi, 1989.
- *Yajurvedabhāṣyam*, Commentary of Maharshi Dayananda Sarasvati, Manav Utthan Sankalpa Sansthan : Delhi, 2010.


### Secondary Sources :


- Dwivedī, Dr. Kapildev. *Vaidika Sāhitya evam Sanskṛti*. Varanasi : Vishvavidyalay Prakashan, 2008.
- Goyel, Dr. Pritiprabha. *Bhāratīya Saṃskṛti*. Jodhapur : Rajasthani Granthagar, 2008.
- Panta, Dr. Lajja. "Vedeṣu Nārī́śaktiḥ." *Prācyavidyānusandhānam,* Year 9, Issue 1 (2014): 37-39.
- Ram, Dr. Babu. "Veda aura Nārī." *Vedavidyā,* Vol :XXI, Jan - Jun (2013): 155-159.
- Upadhyay, Baldev. *Sanskṛta Vāṅmaya kā bṛhad itihāsa*. Lucknow : Uttar Pradesh Sansthan, 2012.
- Upadhyay, Baldev. *Vaidika Sāhitya aura Sanskṛti.* Varanasi : Sharda Sansthan, 1998.